# राष्ट्रियसंस्कृतविद्यापीठम् :: तिरुपतिः

## RASHTRIYA SANSKRIT VIDYAPEETHA :: TIRUPATI

(विश्वविद्यालयानुदानायोगस्य १ ९ ५ ६ धारायास्तृतीयानुभागेन स्थापितः विश्वविद्यालयः)
(University established under section 3 of UGC Act, 1956)
(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा ए श्रेण्या पुनर्मानितः)
(Re-accredited at 'A' Level by NAAC)

प्रधानपोषकः
Chief Patron
आचार्यः वि.मुरलीधर शर्मा
कुलपतिः
Prof. V. Muralidhara Sharma
Vice-Chancellor

अध्यक्षः
President
आचार्यः एम्.एल्.नरसिंहमूर्तिः
Prof. M.L.N.Murthy

उपाध्यक्षः
Vice-President
आचार्यः जा. रामकृष्णः
Prof. J.Ramakrishna

समायोजकाः
Co-ordinators

आचार्यः ओ.श्रीरामलाल शर्मा
Prof. O.Sriramalala Sarma
Ph: 09393620633

आचार्यःजी.एस्.आर्.कृष्णमूर्तिः
Prof. G.S.R.Krishna Murthy
Ph: 09441408796

डा. के. गणपति भट्टः
Dr. K.Ganapathi Bhat
Ph: 09440773072

डा. के. विश्वनाथः
Dr. K.Viswanatha
Ph: 09849428638

अतिरिक्तसमायोजकाः
Addnl. Co-ordinators
डा. नारायणाचार्
Dr. Narayanachar
Ph: 09490077161

डा. ओ.जी.पि.कल्याणशास्त्री
Dr. O.G.P.Kalyana Sastry
Ph: 08885673667

श्री. यशस्वी
Sri Yashaswee
Ph: 09441451900

## अखिलभारतीयशास्त्रार्थप्रशिक्षणवर्गः

## ALL INDIA SASTRARTHA TRAINING CAMP - 2018

**अयि भोः मान्याः !**

जानन्ति एव सर्वे संस्कृतभाषाभिमानिनः यत् तिरुपतिस्थं राष्ट्रियसंस्कृतविद्यापीठं समग्रे भारते देशे संस्कृतविश्वविद्यालयेषु विशिष्टं स्थानम् अलङ्करोति इति । विश्वविद्यालयानुदानायोगेन "पारम्परिकशास्त्रसमुत्कर्षकेन्द्रत्वेन (Centre for Excellence in Traditional Shastras) सम्मानितमिदं विद्यापीठं संस्कृतभाषायाः एवं साम्प्रदायिकशास्त्राणां रक्षणाय प्रचारणाय च बहून् विशिष्टान् कार्यक्रमान् प्रचालयति इति च ।

तेषु अन्यतमं **शास्त्रार्थप्रशिक्षणवर्ग**नामकं कार्यक्रमम् इतः पूर्वं २०००, २००३,२०१७ वर्षेषु प्राचालयत् । तद्द्वारा प्राप्तं साफल्यं मनसिकृत्य इदं हि विद्यापीठं छात्राणां ज्ञानोपकारकं यशस्वि च तादृशं कार्यक्रमम् ऐषमः **मे मासस्य अन्तिम-सप्ताहात् आरभ्य १५ दिनानि** यावत् तिरुपतौ चालयितुं समीहते ।

अस्मिन् शास्त्रार्थप्रशिक्षणवर्गे -

**१. नव्यन्यायः । २. व्याकरणम् । ३. पूर्वमीमांसा । ४. साहित्यम्**

**५.अद्वैतवेदान्तः । ६. द्वैतवेदान्तः । ७. ज्यौतिषम् ।**

-इति सप्तसु विषयेषु प्रसिद्धैः पण्डितैः एकस्मिन् निर्दिष्टे ग्रन्थे प्रतिदिनं पाठनं क्रियते । एवं कैश्चित् पण्डितैः चितेषु विषयेषु स्वीया वाक्यार्थविचारसरणिः प्रदर्श्यते । छात्राणाम् अपि वाक्यार्थकरणे प्रशिक्षणं प्रोत्साहनं च क्रियते ।

**अनेन शास्त्रार्थप्रशिक्षणवर्गेण सम्पत्स्यमानानि प्रयोजनानि -**

- छात्राणां तेषु तेषु शास्त्रविषयेषु निर्दिष्टग्रन्थे सूक्ष्मविषयकज्ञानस्य लाभः ।
- छात्राणां देशे समग्रे प्रसिद्धानां पण्डितानां संसर्गलाभः - तन्निकटे विशिष्टशास्त्र-ग्रन्थाध्ययनस्य अवकाशः ।
- छात्राणां विशिष्टानां पण्डितानां वाक्यार्थकरणशैल्याः प्रत्यक्षनिरीक्षणस्य अनुकरणस्य च अवकाशः ।
- छात्राणां स्वशास्त्रविषये वाक्यार्थकरणाभ्यासेन वाक्यार्थकौशलप्राप्तिः ।

इत्येवं महान्ति बहूनि प्रयोजनानि अनेन भविष्यन्ति ।

Email : rsvp.aistc@gmail.com

## अस्मिन् के भागं ग्रहीतुं शक्नुवन्ति ?

- अस्मिन् शास्त्रार्थप्रशिक्षणवर्गे भागं ग्रहीतुम् तत्तद्विषये आचार्यद्वितीयवर्षीयाः (M.A. 2nd Year), विशिष्टाचार्यकक्ष्यीयाः (M.Phil.) , विद्यावारिधिच्छात्राः (Ph.D. Scholars) तत्समकक्ष्याश्च अर्हाः। मीमांसायां तु वेदभाष्ये, मीमांसायाम् , अद्वैतवेदान्ते, द्वैतवेदान्ते वा उक्तकक्ष्यीयाः अनुमन्यन्ते।

## अर्हतापरीक्षा :-

- एतेषां छात्राणाम् निर्दिष्टे दिनाङ्के तिरुपतिराष्ट्रियसंस्कृतविद्यापीठे अर्हतापरीक्षा भविष्यति । तस्यां लेखनमौखिकपरीक्षे भवतः ।
- चितानां छात्राणां निश्शुल्का आवासभोजनव्यवस्था प्रकल्पयिष्यते ।
- साम्प्रदायिकानां छात्राणाम् अपेक्षिता भोजनव्यवस्था विद्यापीठेन पार्थक्येन प्रकल्पयिष्यते ।
- एवं चितानां छात्राणां स्वस्थानात् तिरुपतिविद्यापीठं प्रति आगन्तुं गन्तुं च रेलयानस्य द्वितीयश्रेणी शयनयानस्य व्ययः (Sleeper Class fare) दास्यते ।
- अर्हतापरीक्षार्थम् आगतानाम् तस्याम् अनुत्तीर्णानां छात्राणां मार्गव्यये अर्धं दास्यते ।
- अर्हतापरीक्षायाम् अनुत्तीर्णानां वर्गे प्रवेशः नास्ति ।

श्रीमन्तः तत्र भवन्तः छात्रहितकारिणः सम्प्रार्थ्यन्ते यत् भवन्तः स्वसंस्थायाः आचार्यकक्ष्यायाः द्वितीयवर्षीयान्, विशिष्टाचार्यकक्ष्यायाम् अधीयानान्, शोधच्छात्रान् च एतादृशसैकर्यातिशयवति, महाप्रयोजनसाधके **शास्त्रार्थप्रशिक्षणवर्गे** अस्मिन् भागं ग्रहीतुम् सम्प्रेष्य योग्यानां छात्राणां विद्याभिवृद्धये अवकाशं कल्पयन्तु इति अस्माकं प्रार्थना ।

अचिरादेव अस्य कार्यक्रमस्य अभ्यर्थनपत्रेण सह कार्यक्रमस्य विशेषाः इत्यादयः भवतां सन्निधौ सम्प्रेषयिष्यन्ते । अस्माकं विद्यापीठस्य अन्तर्जालसंकेते (www.rsvidyapeetha.ac.in) अपि कार्यक्रमस्य अस्य विशेषाः स्थाप्यन्ते । भवतां सन्देहनिरासाय विविधविषयाणां ज्ञानाय च प्रथमपुटे निर्दिष्टदूरध्वनिक्रमाङ्कैः सह सम्पर्कं कर्तुं शक्नुवन्ति। एवं **rsvp.aistc@gmail.com** इति सङ्केते ईमेलद्वाराऽपि सम्पर्कं कर्तुं पारयन्ति। कार्यक्रमम् अमुं सफलं कृत्वा संस्कृतच्छात्राणां शास्त्रादिषु विज्ञानं, तत्र वाक्यार्थकौशलं च अभिवर्धयितुम् उपकारं कुर्वन्तु इति सम्प्रार्थयामः -

ओ. श्रीरामलालशर्मा

**समायोजकः**
**आचार्यः ओ.श्रीरामलाल शर्मा**

# राष्ट्रियसंस्कृतविद्यापीठम् :: तिरुपतिः

## RASHTRIYA SANSKRIT VIDYAPEETHA :: TIRUPATI

(विश्वविद्यालयानुदानायोगस्य १ ९ ५ ६ धारायास्तृतीयानुभागेन स्थापितः विश्वविद्यालयः)
(University established under section 3 of UGC Act, 1956)
(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा ए श्रेण्या पुनर्मानितः)
(Re-accredited at 'A' Level by NAAC)


प्रधानपोषकः
Chief Patron
आचार्यः वि.मुरलीधर शर्मा
कुलपतिः
Prof. V. Muralidhara Sharma
Vice-Chancellor

अध्यक्षः
President
आचार्यः एम्.एल्.नरसिंहमूर्तिः
Prof. M.L.N.Murthy

उपाध्यक्षः
Vice-President
आचार्यः जा. रामकृष्णः
Prof. J.Ramakrishna

समायोजकाः
Co-ordinators

आचार्यः ओ.श्रीरामलाल शर्मा
Prof. O.Sriramalala Sarma
Ph: 09393620633

आचार्यःजी.एस्.आर्.कृष्णमूर्तिः
Prof. G.S.R.Krishna Murthy
Ph: 09441408796

डा. के. गणपति भट्टः
Dr. K.Ganapathi Bhat
Ph: 09440773072

डा. के. विश्वनाथः
Dr. K.Viswanatha
Ph: 09849428638

अतिरिक्तसमायोजकाः
Addnl. Co-ordinators

डा. नारायणाचार्
Dr. Narayanachar
Ph: 09490077161

डा. ओ.जी.पि.कल्याणशास्त्री
Dr. O.G.P.Kalyana Sastry
Ph: 08885673667

श्री. यशस्वी
Sri Yashaswee
Ph: 09441451900


## अखिलभारतीयशास्त्रार्थप्रशिक्षणवर्गः-२०१८
## ALL INDIA SASTRARTHA TRAINING CAMP - 2018

Respected Sir / Madam,

As you are aware, the **RASHTRIYA SANSKRIT VIDYAPEETHA** has always been on the forefront for the preservation and propagation of traditional Sanskrit learning. The grant of "**CENTRE FOR EXCELLENCE IN TRADITIONAL SASTRAS**" by the **UGC** stands proof to this. The Vidyapeetha had, time and again, conducted numerous programs for the upliftment and dissemination of Sanskrit Language and Traditional Sastras.

One amongst such prestigious programs is the conduct of **ALL INDIA SASTRARTHA TRAINING CAMP.** Three such camps were previously conducted by the Vidyapeetha, one in December 2000 next in December 2003 and finally in May 2017, and all were grand successes. It is hereby decided that another Sastrartha Training Camp shall be conducted from the **last week of May 2018 for a duration of fifteen days** in the Vidyapeetha. The Camp shall be conducted in **7 Sastras** *viz*

**1. Navya Nyaya, 2.Vyakarana, 3.Purva Mimamsa, 4. Sahitya**

**5. Advaita Vedanta, 6.Dwaita Vedanta, 7. Jyotisa**

Various reputed scholars from different parts of the country will teach the students in this training camp on chosen topics. Selected scholars will also demonstrate the traditional **VAKYARTHA (method of debate)** in their concerned subjects and shall train the students also to perform the same.

The Training Camp is being conducted to achieve the following aims:

- In-depth teaching of Sastric topics including the knotty parts shall be done by various scholars of high repute.
- Chosen students will have the golden opportunity of learning the Sastras under proficient, well-versed scholars.
- Students will also have the opportunity to witness the method of **VAKYARTHA**, which shall be done by the scholars.


Email : rsvp.aistc@gmail.com

- Students shall also be trained by these scholars to perform **VAKYARTHA** and in doing so, they will gain in-depth knowledge and clarity in their subject areas.

**WHO ARE ELIGIBLE TO PARTICIPATE?**

- Acharya / M.A.**/** Equivalent Degree 2nd year students, M.Phil scholars and Ph.D. scholars are eligible to participate in this training camp. For Mimamsa, students pursuing Mimimsa, Vedabhasya, Advaita Vedanta and Dvaita Vedanta in the aforementioned levels shall be eligible.

**ENTRANCE TEST**

- Students who will register to participate in this camp will have to undergo an **ENTRANCE TEST** in the Vidyapeetha**.** The test shall consist of a written test as well as an Oral Interview.
- Once selected in the entrance test, the students shall be provided with free lodging and boarding facilities. Food shall be provided to the selected students on free of cost.
- Sufficient and necessary facilities shall also be provided by the Vidyapeetha for **Traditional Students**.
- T.A. in Sleeper Class (both to and fro) shall be given to the students who are selected for the training camp.
- Students, who appear for the Entrance Test but do not get selected, shall be provided with **ONE WAY TRAVEL FARE** (Sleeper Class) only.
- Students who fail to qualify the entrance exam shall not be allowed to participate in the Sastratha Camp.

Therefore, we request you to send suitable candidates (Acharya/ M.A. / Any equivalent Degree 2nd Year/ M.Phil/ P.hD scholars) from your reputed institution to participate in this unique & prestigious Training Camp and help in contributing towards the success of this Training Camp.

We will be intimating you very shortly about the Registration Process, the entire structure of the Training Camp along with the Time-table, the subject matter which shall be taught and other such necessary items. Any queries regarding the Training Camp can be communicated to the Co-ordinators and Additional co-ordinators whose phone numbers are given in the first page. Communication can also be sent to the **e-mail :-  rsvp.aistc@gmail.com**

We once again earnestly request you for your cooperation in making this Training Camp a grand success.

प्रो. श्रीरामलालशर्मा

Coordinator
Prof. O.Sri Ramalala Sarma

# राष्ट्रियसंस्कृतविद्यापीठम् :: तिरुपतिः
## RASHTRIYA SANSKRIT VIDYAPEETHA :: TIRUPATI
(विश्वविद्यालयानुदानायोगस्य १ ९ ५ ६ धारायास्तृतीयानुभागेन स्थापितः विश्वविद्यालयः)
(University established under section 3 of UGC Act, 1956)
(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा ए श्रेण्या पुनर्मानितः)
(Re-accredited at 'A' Level by NAAC)



प्रधानपोषकः
Chief Patron
आचार्यः वि.मुरलीधर शर्मा
कुलपतिः
Prof. V. Muralidhara Sharma
Vice-Chancellor

अध्यक्षः
President
आचार्यः एम्.एल्.नरसिंहमूर्तिः
Prof. M.L.N.Murthy

उपाध्यक्षः
Vice-President
आचार्यः जा. रामकृष्णः
Prof. J.Ramakrishna

समायोजकाः
Co-ordinators

आचार्यः ओ.श्रीरामलाल शर्मा
Prof. O.Sriramalala Sarma
Ph: 09393620633

आचार्यःजी.एस्.आर्.कृष्णमूर्तिः
Prof. G.S.R.Krishna Murthy
Ph: 09441408796

डा. के. गणपति भट्टः
Dr. K.Ganapathi Bhat
Ph: 09440773072

डा. के. विश्वनाथः
Dr. K.Viswanatha
Ph: 09849428638

अतिरिक्तसमायोजकाः
Addnl. Co-ordinators
डा. नारायणाचार्
Dr. Narayanachar
Ph: 09490077161

डा. ओ.जी.पि.कल्याणशास्त्री
Dr. O.G.P.Kalyana Sastry
Ph: 08885673667

श्री. यशस्वी
Sri Yashaswee
Ph: 09441451900


## अखिलभारतीयशास्त्रार्थप्रशिक्षणवर्गः-२०१७
## ALL INDIA SASTRARTHA TRAINING CAMP-2017

दिनाङ्कः - १-५-२०१७

**अयि भोः मान्याः !**

राष्टियसंस्कृतविद्यापीठेन संस्कृतशास्त्रच्छात्रोपकाराय **शास्त्रार्थप्रशिक्षिणवर्गः** अस्य संवत्सरस्य मे मासस्य ३१ दिनाङ्कात् आरभ्य जून् मासस्य १५ दिनाङ्कपर्यन्तं सञ्चालयिष्यते इति अस्माभिः पूर्वं प्रेषितेन प्रत्रेण भवन्तः विदन्ति एव। अयं **शास्त्रार्थप्रशिक्षणवर्गः** सप्तसु विषयेषु चाल्यते इति तत्र स्पष्टमेव।

### अस्मिन् शास्त्रार्थप्रशिक्षणवर्गे भागं ग्रहीतुम् अर्हाः -

१. आचार्यकक्ष्या उत तत्समानकक्ष्यायां द्वितीयवर्षीयाः (आचार्यप्रथमवर्षपरीक्षां लिखितवन्तः छात्राः)।

२. विशिष्टाचार्यकक्ष्या तत्समानकक्षाः वा (M.Phil Scholars)

३. शोधच्छात्राः (Research Scholars)

छात्रैः **शास्त्रार्थप्रशिक्षणवर्गे** भागं ग्रहीतुम् अभ्यर्थनपत्रं स्वसंस्थया प्रेषणीयम्। (अभ्यर्थनपत्रम् अस्य पत्रस्य अन्ते संलग्नमस्ति। तद्रीत्यायैव अभ्यर्थनपत्रम् प्रेषणीयम्)

**अभ्यर्थनपत्रस्वीकरणस्य अन्तिमः दिनाङ्कः मे मासस्य २० दिनाङ्कः (20th-May-2017)**

एतेषां छात्राणाम् अर्हतापरीक्षाद्वारा **शास्त्रार्थप्रशिक्षणवर्गे** प्रवेशः लभ्यते।

### अर्हतापरीक्षा

- अर्हतापरीक्षा मे मासस्य ३० दिनाङ्के भविष्यति।
- अस्यां परीक्षायां द्वौ भागौ स्तः।
- लेखनभागे एकाङ्कप्रश्नाः १०, पञ्चाङ्कप्रश्नाः ३ इति रीत्या आहत्य २५ अङ्कानां पत्रं भवति ।
- लेखनपरीक्षा तिरुपतिस्थ राष्ट्रियसंस्कृतविद्यापीठे शिक्षाभवने ३० दिनाङ्के प्रातः भवति।
- लेखनपरीक्षायाः समयः एकघण्टा।

◆ छात्रैः लेखनपरीक्षार्थं ९:०० समये उपस्थितैः भाव्यम्।

◆ ९:३० वादने परीक्षाप्रारम्भः १०:३० वादने समाप्तिः भवति।

◆ लेखनपरीक्षायां उत्तीर्णानाम् एव मौखिकपरीक्षायां प्रवेशः भवति।

◆ मौखिकपरीक्षा मध्याह्ने ३ वादने भविष्यति। मौखिकपरीक्षायां २५ अङ्कानां प्रश्नाः भवन्ति।

◆ लेखनपरीक्षायां मौखिकपरीक्षायां च छात्राणां शब्दसाधुत्वं, वाक्यनिर्माणकौशलम् , **स्वविषये प्राथमिकज्ञानम्** इतीमे विषयाः प्रधानतः परीक्ष्यन्ते।

अर्हतापरीक्षायाम् उत्तीर्णानां छात्राणां **शास्त्रार्थप्रशिक्षणवर्गे** प्रवेशः कल्प्यते। एवं प्रविष्टानां छात्राणाम् आवास-भोजनादिव्यवस्था विद्यापीठेन यथासम्प्रदायं कल्पयिष्यते। रु. २०० (द्विशतं रूप्यकाणि) एकैकस्मिन् दिने छात्रवृत्तिश्च प्रदीयते। **स्त्रीछात्राणां पृथक् रक्षितवासादिव्यवस्था कल्पयिष्यते।**

अर्हतापरीक्षायाम् अनुत्तीर्णानाम् अपि छात्राणां तेषां श्रद्धां पुरस्कृत्य अभ्यर्थनेन विशिष्टानुमत्या श्रवणादौ प्रवेशः अनुमन्यते। एतादृशानां छात्राणां भोजनादिव्यवस्था, छात्रवृत्तिः वा न भवतः। नात्र विवादस्य अवकाशः।

**प्रविष्टानां छात्राणां नियमाः -**

❍ छात्रैः सर्वैः अपि सर्वेषु दिनेषु अवस्थातव्यम्।

❍ सर्वेषु पाठेषु सश्रद्धं भागः ग्राह्यः।

❍ दैनन्दिनी/समयसारिणी सम्यक् अनुसर्तव्या।

❍ अध्यापकेषु विनयेन वर्तितव्यम्।

❍ साम्प्रदायिकवस्त्रधारणम् अवश्यं कर्तव्यम्।

❍ नियमपालनम् अवश्यं कर्तव्यम्।

❍ शास्त्रार्थप्रशिक्षणवर्गे भागग्राहिभिः सर्वैः छात्रैः अवश्यं स्वीया वाक्यार्थकरणप्रतिभा प्रदर्शनीया एव भवति।

❍ शास्त्रार्थप्रशिक्षणवर्गस्य अन्ते ५० अङ्कानां लेखनपरीक्षा भवति। अस्यां परीक्षायां छात्रैः उत्तीर्णता सम्पाद्या।

**समायोजकः**

**आचार्यः ओ. श्रीरामलालशर्मा**

# राष्ट्रियसंस्कृतविद्यापीठम् :: तिरुपतिः (आं.प्र.)

## अखिलभारतशास्त्रार्थप्रशिक्षणवर्गः - २०१७

## *समयसारिणी*

---

| | |
|---|---|
| उत्थानं - कालकृत्यानि | प्रातः ५.०० - ६.३० |
| योगाभ्यासः - प्राणायामः | प्रातः ६.३० - ७.१५ |
| अल्पाहारः | प्रातः ७.१५ - ७.४५ |
| प्रार्थना | प्रातः ८.०० -८.१५ |
| पाठः | प्रातः ८.३० - ९.४५ |
| पानीयम् | प्रातः ९.४५ - १०.०० |
| पुनः पाठः | प्रातः१०.०० - ११.१५ |
| आदर्श वाक्यार्थः | प्रातः ११.३० - १२.३० |
| भोजनविरामः | मध्याह्ने १२.३० - २.३० |
| पाठः | अपराह्ने २.३० - ३.४५ |
| पानीयम्/लघुविरामः | अपराह्ने ३.४५ -४.०० |
| पुनः पाठः | अपराह्ने ४.०० - ५.३० |
| सायं विरामः | सायं ५.३० - ६.०० |
| पुनश्चरणम् /वाक्यार्थाभ्यासः/ शैक्षिक - सांस्कृतिकस्पर्धाः | सायं ६.०० - ८.३० |
| रात्रिभोजनविरामः | रात्रौ ८.३० - ९.०० |
| लेखनाद्यभ्यासः | रात्रौ ९.०० - १०.०० |
| निद्रा | रात्रौ १०.०० |

# राष्ट्रियसंस्कृतविद्यापीठम् :: तिरुपतिः (आं.प्र.)

## अखिलभारतशास्त्रार्थप्रशिक्षणवर्गः - २०१७

### *अभ्यर्थनपत्रम्*

नाम :

वयः/जन्मतिथिः :

लिङ्गम् :

पितुः/मातुः नाम :

कक्ष्या - विषयः :

संस्था (यत्र अध्ययनं चलति) :

संस्थायाः सङ्केतः :

Affix

Passport Size

Photo

स्वस्य दूरध्वनिक्रमाङ्कः :

स्वस्य E-mail Id :

शास्त्रार्थप्रशिक्षणवर्गे चितः विषयः :

अहम् उपरि निर्दिष्टाः अंशाः सर्वे सत्याः इति प्रमाणयामि। शास्त्रार्थप्रशिक्षणवर्गे चितः चेत् तत्र सर्वान् नियमान् पालयामि इति प्रतिजाने। वर्गे अस्मिन् प्रवेशं कल्पयितुम् अभ्यर्थये।

छात्रस्य हस्ताक्षरम्

अयं .................................. नामा छात्रः अस्माकं .............................. विद्यालये/संस्थायां ...............................कक्ष्यायाम् अधीयानः छात्रः इति प्रमाणयामि। अखिलभारतशास्त्रार्थप्रशिक्षणवर्गे अस्य प्रवेशः कल्पनीयः इति अनुरुन्धे।

दिनाङ्कः : विद्यालयस्य/संस्थायाः अधिकारिणः हस्ताक्षरम्

स्थानम् : मुद्रा

◆ पत्रप्रेषणाय अन्तिमदिनाङ्कः **May 20, 2017** ◆ पूरितानि पत्राणि छात्राः scan कृत्वा **rsvp.aistc@gmail.com** इति सङ्केते प्रेषयितुं शक्नुवन्ति, परन्तु अर्हतापरीक्षादिने Originals अवश्यम् अनेतव्यानि। ◆ असंपूर्णपत्राणि नानुमन्यन्ते।

◆ अखिलभारतशास्त्रार्थप्रशिक्षणवर्गे प्रवेशानुमतिदाने सर्वेऽपि अधिकाराः विद्यापीठाधीनाः ◆ पूरितानां पत्राणां प्रेषणाय संङ्केतः - **The Coordinator, All India Sastrartha Training Camp - 2017, Rashtriya Sanskrit Vidyapeetha, Tirupati - 517507.**

(7)

# RASHTRIYA SANSKRIT VIDYAPEETHA

(Deemed University)
TIRUPATI – 517 507.

F.No. RSV/Estt./AISTC/2018 Dated : 25.05.2018

**OFFICE ORDER**

Sub : R.S.Vidyapeetha – Establishment – Constitution of Committee for the conduct of All India Shastrartha Training Camp (AISTC) from 27.05.2018 to 11.06.2018 – Orders – Issued – Regarding.

Ref : Note order of the Vice-Chancellor dated

***

The Vice-Chancellor is pleased to constitute the following committee for the conduct of All India Shastrartha Training Camp (AISTC) from 27.05.2018 to 11.06.2018 at Rashtriya Sanskrit Vidyapeetha, Tirupati.

| | | |
|---|---|---|
| 1. Prof. M.L.Narasimha Murthy<br>Department of Advaita Vedanta | : | Chairman |
| 2. Prof. J. Ramakrishna<br>Department of Vyakarana | : | Deputy Chairman |
| 3. Prof. O.S.Ramalala Sarma<br>Department of Nyaya | : | Co-ordinator |
| 4. Prof. G.S.R.Krishna Murty<br>Department of Sahitya | : | Co-ordinator |
| 5. Dr. K.Ganapathi Bhat<br>Department of Advaita Vedanta | : | Co-ordinator |
| 6. Dr. K. Viswanatha<br>Department of Advaita Vedanta | : | Co-ordinator |
| 7. Dr. Narayana<br>Department of Dvaita Vedanta | : | Addl. Co-ordinator |
| 8. Dr. O.G.P.Kalyana Sastry<br>Department of Sabdabodha | : | Addl. Co-ordinator |
| 9. Sri. Yashaswee<br>Department of Vyakarana | : | Addl. Co-ordinator |

M. [signature]

**ASSISTANT REGISTRAR**

To
All the concerned

Copy to
The Co-ordinator, All India Shastrartha Training Camp, Rashtriya Sanskrit Sansthan, New Delhi
For favor of information.
All Deans of Faculties
Head Department of Vyakarana, Advaita Vedanta, Dvaita Vedanta, Nyaya.
The D.R. & F.O. i/c., RSV.
The Assistant Registrar (F&A), RSV.
PS to Vice-Chancellor/Registrar, RSV.
Personal Files, OO file.

# अखिलभारतशास्त्रार्थप्रशिक्षणवर्गः – 2018

# कार्यक्रमप्रतिवेदनम्

(राष्ट्रियसंस्कृतसंस्थानस्य वित्तसाहाय्येन समायोजितः)

## ALL INDIA SASTRARTHA TRAINING CAMP – 2018

(organized from 27-05-2018 to 11-06-2018with the financial assistance of Rashtriya Sanskrit Sansthan, New Delhi)

# A REPORT


## RASHTRIYA SANSKRIT VIDYAPEETHA

University Established. u/s. 3 of UGC Act, 1956 under MHRD, Govt of India

Reaccredited at 'A' Grade by NAAC with a CGPA of 3.71

**TIRUPATI, ANDHRA PRADESH – INDIA**
**517507**

# अखिलभारतशास्त्रार्थप्रशिक्षणवर्गः - 2018

## राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः




Report

राष्ट्रियसंस्कृतविद्यापीठेन अनेन 2000, 2003 एवं 2017 वर्षेषु प्रचालितः **अखिलभारतशास्त्रार्थप्रशिक्षणवर्गः** अस्मिन्नपि 2018 वत्सरे प्रचालनीयः इति कुलपतिप्रमुखाः ज्येष्ठाः निरणैषुः। तदर्थं **कुलपतीनां आचार्य.वि.मुरलीधरशर्मणां** मार्गनिर्देशने समायोजनसमितिः आयोजिता। अनया समित्या सर्वे संस्कृतविश्वविद्यालयानां सूचना प्रदत्ता। आचार्य, विशिष्टाचार्य, शोधच्छात्राणां अभ्यर्थनपत्राणि प्रायः 90 सम्प्राप्तानि। तेषु उपषष्टिश्छात्राः प्रवेशपरीक्षार्थम् उपस्थिताः। प्रवेशपरीक्षा च 26-05-2018 दिनाङ्के शिक्षाशास्त्रिभवने सञ्चालिता। 1. न्याय, 2. व्याकरण, 3. पूर्वमीमांसा, 4.ज्यौतिष, 5. साहित्य, 6. द्वैतवेदान्त, 7. अद्वैतवेदान्तशास्त्रेषु छात्राः प्रवेशपरीक्षामलिखन्। तेषु 45 छात्राः तेषु तेषु शास्त्रेषु भागं ग्रहीतुं चिताः।




अस्य कार्यक्रमस्य उद्घाटनकार्यक्रमः 27-05-2018 दिनाङ्के शिक्षाशास्त्रिभवने सञ्चालितः। वैदिकमङ्गलाचरण-दीपप्रज्वलनाभ्यां कार्यक्रमः प्रारब्धः। वर्गस्यास्य समायोजकाः आचार्याः **आचार्य.ओ.श्रीरामलाल-शर्माणः** वर्गस्यास्य उद्देश्यानि विवृत्य सर्वेषां स्वागतं व्याहृतवन्तः।




श्रीमन्तः आचार्याः **रामचन्द्र.जि.भट्टमहोदयाः** (कुलपतयः एस्-व्यास विश्वविद्यालयः, बेङ्गलूरु) अस्य कार्यक्रमस्य मुख्यातिथयः भूत्वा छात्रान् दृश्यविधानेन वाक्यार्थकौशल-तन्त्रम् अधिकृत्य समुदबोधयन्।



आचार्याः **म.म.चिं. पूर्णानन्दशास्त्रिणः** सारस्वतातिथयः भूत्वा व्याकरणशास्त्रे वाक्यार्थं कृत्वा कार्यक्रमः यशस्वी भूयादिति, छात्राः सर्वे शास्त्रार्थकरणकुशलाः भवेयुरिति च आशिषः अब्रुवन्।




विद्यापीठस्यास्य कुलपतयः आचार्याः **वि.मुरलीधरशर्माणः** कार्यक्रमस्यास्य आध्यक्षम् ऊढ्वा छात्रान् सर्वानपि विद्यासमुपार्जनाय शास्त्रार्थकरणकौशलसम्पादनाय च प्रैरयन्।

कार्यक्रमेऽस्मिन् म.म.एन्.एस्. रामानुज ताताचार्य-विरचितपञ्चलक्षणीव्याख्यानस्य तृतीयमुद्रणस्य आविष्कारः मान्यैः कृतः।




अन्ते च डा.कु.**विश्वनाथशर्मभिः** धन्यवादाः सर्वेभ्यः समर्पिताः।


तदनु तस्मिन्नेव दिने मध्याह्ने 3 वादने पाठाः प्रारब्धाः। प्रतिदिनं प्रातः 8:30 वादनात् आरभ्य 10:00 वादनपर्यन्तं पाठः। 10:15 वादनमारभ्य 11:45 पर्यन्तं पुनःपाठः/चिन्तनम्। मध्याह्ने 12 वादनात् एकवादनपर्यन्तम् एकेन विशिष्टेन उत्तमविदुषा आदर्शवाक्यार्थः। भोजनविरामानन्तरं 3 वादनात् चतुर्वादनपर्यन्तं पाठः 4:15 वादनात् 5:15 वादनपर्यन्तं पुनःपाठः/चिन्तनम्। 5:15 वादनात् 6:15 पर्यन्तं वाक्यार्थाभ्यासः। 6:30 वादनात् 8:00 वादनपर्यन्तं शैक्षिकसास्कृतिककार्यक्रमाःइति प्रधानकार्यक्रमाः आयोजिताः। एवं छात्राणां एकाग्रताभिवृद्धये उषःकाले 5:30 वादनादारभ्य 6:30 पर्यन्तं योगाभ्यास/प्राणायामकार्यक्रमः अपि समायोजितः। सर्वे छात्राः प्रातः 5 वादनात् रात्रौ 10 वादन पर्यन्तं यथा शास्त्रविद्याव्यासङ्गे एव यथा भवेयुः तथा दैनन्दिनी रचिता एवं पालिता च।

11-06-2018 दिनाङ्के सोमवासरे प्रातः 11 वादने वर्गस्यास्य समापनोत्सवः शिक्षाशास्त्रभवने सम्पन्नः। मङ्गलाचरणपुरस्सरमयं कार्यक्रमः प्रारब्धः। अस्मिन्समापनोत्सवे अतिथीनां सर्वेषाम् आचार्याः.ओ. रामलालशर्माणः स्वागतं व्याहरन्। तदनु 1.के. नवीन् 2.वेदेश नागसम्पिगः3.तेजस्विनी 4.विघ्नेश रामस्वामि अय्यर् छात्राः स्वीयवाक्यार्थनैपुणीलेशं प्रादर्शयन्। एवं 1.किशोरः2.रोहित कुमारः3.कौशिकःछात्राः वर्गेऽस्मिन् स्वीयान् अनुभवान् प्राकटयन्। श्रीमन्तः डा.कोम्पेल्ल सत्यनारायण शास्त्रिणः कार्यक्रमस्य मुख्यातिथिपदं विभूषयन्तः सर्वे छात्राः एतस्मिन् वर्गे शास्त्रार्थकरणाभ्यासश्रमं कृतवन्तः इति सन्तोषं प्रकटय्य एवमेव अग्रेऽपि अयं कार्यक्रमः अनुवर्तनीयः इत्युपादिशन्। सर्वेभ्यः छात्रेभ्यः श्री वेङ्कटेश्वरप्रसादपूर्वकं प्रमाणपत्राणि श्रीकुलपतिभिः मुख्यातिथिभिश्च वितीर्णानि। अन्ते धन्यवादसमर्पणानन्तरं वैदिकेन मङ्गलाचरणेन अयं कार्यक्रमः साधु समापितः। सर्वे च छात्राः विशेषतः भूरिभोजनेन परितोषिताः स्वस्वग्रामगमनाय च उद्युक्ताः।

# अखिलभारतशास्त्रार्थप्रशिक्षणशिबिरम् - २०१८

## ALL INDIA SHASTRARTHA TRAINING CAMP


**Dt.27.05.2018 to 11.06.2018**



महत: संस्कृतवाङ्मयप्रपञ्चस्य दुर्लभ-दुर्बोध्य-शास्त्रसमुच्चयस्य तात्त्विकपरिशीलनार्थं सहजसुखबोधार्थञ्च राष्ट्रियसंस्कृतविद्यापीठेनानेन विगतवर्षमिव अस्मिन् वर्षेऽपि अखिलभारतशास्त्रार्थप्रशिक्षणवर्गस्य समायोजनं **27.05.2018** दिनाङ्कात् **11.06.2018** दिनाङ्कं यावत् यथाविधि समपद्यत। कुलपतीनाम् आचार्य वि.मुरलीधर शर्मणां मार्गनिर्देशने एतदर्थं नियोजिता समायोजनसमिति: यथाकालं यथाविधि च नवतिसंख्याकानाम् आचार्य-विशिष्टाचार्य-विद्यावारिधिच्छात्राणाम् अभ्यर्थनपत्राणि सम्प्राप्य प्रवेशपरीक्षां **26.05.2018** दिनाङ्के शिक्षाशास्त्रिभवने समचालयत् । तेषु उपषष्टिश्छात्रा: उपस्थिता आसन् । न्याय-व्याकरण-पूर्वमीमांसा-ज्यौतिष-साहित्य-द्वैतवेदान्त-अद्वैतवेदान्तशास्त्रेषु ४५ छात्रा: भागग्रहणाय अचिन्वन्त ।

अस्य कार्यक्रमस्य समुद्घाटनसमारोह: वैदिकमङ्गलाचरण-दीपप्रज्वालनाभ्यां २७.०५.२०१८ दिनाङ्के शिक्षाशास्त्रिभवने प्रारभत । वर्गस्यास्य समायोजका: आचार्या: ओ.श्रीरामलालशर्माण: प्रशिक्षणशिबिरस्य उद्देश्यानि विवृत्य सर्वेषां स्वागतं समभिव्याहरन् ।श्रीमन्त: आचार्या: रामचन्द्र जि.भट्टमहोदया: (कुलपतय: एस्.व्यासविश्वविद्यालय:, वेङ्गलूरु) अस्य कार्यक्रमस्य मुख्यातिथय: छात्रान् दृश्यविधानेन वाक्यार्थकौशलतन्त्राणि अधिकृत्य समुदबोधयन् । **आचार्य म.म.चिं. पूर्णानन्दशास्त्रिण:** सारस्वतातिथिरूपेण समागत्य व्याकरणशास्त्रे महाभाष्यमधिकृत्य वाक्यार्थं कृत्वा कार्यक्रम: यशस्वी भूयादिति, छात्रा: सर्वे शास्त्रार्थकरणकुशला: भवेयुरिति च आशिष: अब्रुवन् । विद्यापीठस्य कुलपतय: **आचार्या: वि.मुरलीधरशर्माण:** कार्यक्रमस्यास्य आध्यक्ष्यमूढ्वा छात्रान् सर्वानपि विद्यासमुपार्जनाय शास्त्रार्थकरणकौशल- सम्पादनाय च प्रैरयन् । सन्दर्भेऽस्मिन् पद्मभूषण म.म.एन्.एस्.रामानुजताताचार्यविरचितस्य गादाधरीपञ्चलक्षणी-व्याख्यानस्य तृतीयसंस्करणस्य आविष्कार: मान्यै: अक्रियत । अन्ते **डॉ.कु.विश्वनाथशर्ममहोदया:** समागतानामतिथीनां सर्वेषां विदुषां तथा छात्राणां कृते च धन्यवादान् समार्पयन् ।

तदनु तस्मिन्नेव दिने मध्याह्ने ३ वादने पाठा: प्रारब्धा: । कार्यक्रमस्य सुचारुचालनार्थं छात्राणां कृते प्रात: पञ्चवादनात् प्रारभ्य रात्रौ दशवादनं यावत् एका विधिबद्धसमयसारिणी निर्मिताऽऽसीत् । सारण्यामस्यां छात्राणाम् नित्यकर्मविधिसम्पादनकौशलम्, अध्ययनप्रक्रिया, अध्यापनसोपानम्, पुनरालोकनम्, अधीतविषयस्य मूल्याङ्कनम्, समयानुवर्तिता, शारीरिक-स्वस्थतासम्पादनार्थं योगाभ्यास:, ध्यानाभ्यास:, सांस्कृतिककार्यक्रमै: मनोविनोद: इत्यादयो नैके विषया: सन्निविष्टा आसन् ।







पञ्चदश दिनानि यावत् सञ्चालितेऽस्मिन् कार्यक्रमे पाठ्यक्रमाङ्गतया न्यायशास्त्रस्य **"सव्यभिचारं प्रथमलक्षणम्"**, अद्वैतवेदान्ते **"शास्त्र-सिद्धान्तलेशसंग्रहस्य प्रथमपरिच्छेदः"**, द्वैतवेदान्ते **"तात्पर्यचन्द्रिका"**, व्याकरणे **"शब्दार्थसहिता प्रौढमनोरमा"**, साहित्ये **"ध्वन्यालोकस्य ३-४ उद्योतौ"**, मीमांसायां **"मीमांसान्यायप्रकाशः"**, ज्योतिषे **"सूर्यसिद्धान्तस्य मध्यमाधिकारः, स्पष्टाधिकारः, त्रिप्रश्नाधिकारश्च"** इति सप्तशास्त्राणां निर्दिष्टविषयाः निर्धारिता अभूवन् ।

प्रशिक्षणशिबिरेऽस्मिन् भागग्रहीतृणां मूल्याङ्कनं तत्तच्छास्त्रनिपुणाः विद्वत्प्रवराः तत्तच्छात्रमुखाद् वाक्यार्थश्रवणेन लिखितपरीक्षया च अकुर्वन् ।

सांस्कृतिककार्यक्रमेषु विद्यापीठस्य **"प्रातिभम्"** इति सभामण्डपे समायोजितम् एम्.एम्.डॉ.सिहेच्. श्रीरामशर्ममहोदयानाम् अष्टावधानम् ; श्रीपद्मावतीमहिलाविश्वविद्यालयस्य सङ्गीतविभागस्य सहायकाचार्याणां डॉ.आर्.एन्.एस्.शैलेश्वरीमहाभागानां भक्तिसङ्गीतगानम्, राष्ट्रियसंस्कृतविद्यापीठस्य अतिथ्यध्यापिकायाः डॉ.शिरिषामहाभागायाः सङ्गीतोपस्थापनम्, श्रीराजमोहनमहोदयानां अन्नमाचार्यसङ्कीर्तनगानम्, डॉ.शङ्करभट्टमहोदयानां च हरिकथावाचनं सर्वथा समेषां मनोमोहकमासीत् ।



अन्ते जुन्मासस्य एकादशे दिनाङ्के कुलपतीनामाध्यक्ष्ये ; प्रसिद्धव्याकरणविन्महामहोपाध्याय-डॉ.के.सत्यनारायणमहाभागानां मुख्यातिथिपदभूषिते सति कार्यक्रमस्यास्य स्वस्तिवाचनिकमहोत्सवः पर्यपाल्यत । डॉ,सत्यनारायणमहोदयाः तेषां मुख्यातिथिभाषणे पारम्परिकपाठविधौ पङ्क्तिपाठस्य महत्त्वं प्रतिपादयन्तः, तत्सुरक्षणार्थं नियततत्परं राष्ट्रियसंस्कृतविद्यापीठं भूरिशः प्राशंसन् । कुलपतयोऽपि स्वीयाभिभाषणे संस्कृतस्य प्रचारप्रसारार्थं विद्यापीठेन सर्वदा यत्नः विधास्यते इति प्रत्यश्रुण्वन्। अन्ते भागग्रहीतृणां कृते प्रमाणपत्राणि अतिथिभिः प्रदत्तानि, कार्यक्रमस्य संयोजकाः डॉ.के.विश्वनाथमहोदयाः सर्वेषां कृते धन्यवादान् आविरकुर्वन् ।






**मेधा मे इन्द्रो ददातु मेधां देवी सरस्वती । मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा । (May Indra provide me Intellect, May Saraswati Deve Provide me Intellect. May the twins of Asvins, who have worn the garland of lotuses, provide me Intellect.)**